# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ५८

यामेव रात्रिं शत्रुघ्न पर्णशालां समाविशत् ।
तामेव रात्रिं सीतापि प्रसूता दारकद्वयम् ॥ १॥

ततोऽर्धरात्रसमये बालका मुनिदारकाः ।
वाल्मीकेः प्रियमाचख्युः सीतायाः प्रसवं शुभम् ।
तस्य रक्षां महातेजः कुरु भूतविनाशिनीम् ॥ २॥

तेषां तद्वचनं श्रुत्वा मुनिर्हर्षमुपागमत् ।
भूतघ्नीं चाकरोत्ताभ्या रक्षां रक्षोविनाशिनीम् ॥ ३॥

कुशमुष्टिमुपादाय लवं चैव तु स द्विजः ।
वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम् ॥ ४॥

यस्तयोः पूर्वजो जातः स कुशैर्मन्त्रसंस्कृतैः ।
निर्मार्जनीयस्तु भवेत्कुश इत्यस्य नामतः ॥ ५॥

यश्चापरो भवेत्ताभ्यां लवेन सुसमाहितः ।
निर्मार्जनीयो वृद्धाभिर्लवश्चेति स नामतः ॥ ६॥

एवं कुशलवौ नाम्ना तावुभौ यमजातकौ ।
मत्कृतभ्यां च नमाभ्यां ख्यातियुक्तौ भविष्यतः ॥ ७॥

ते रक्षां जगृहुस्तां च मुनिहस्तात्समाहिताः ।
अकुर्वंश्च ततो रक्षां तयोर्विगतकल्मषाः ॥ ८॥

तथा तां क्रियमाणां तु रक्षां गोत्रं च नाम च ।
सङ्कीर्तनं च रामस्य सीतायाः प्रसवौ शुभौ ॥ ९॥

अर्धरात्रे तु शत्रुघ्नः शुश्राव सुमहत्प्रियम् ।
पर्णशालां गतो रात्रौ दिष्ट्या दिष्ट्येति चाब्रवीत् ॥ १०॥

तथ तस्य प्रहृष्टस्य शत्रुघ्नस्य महात्मनः ।
व्यतीता वार्षिकी रात्रिः श्रावणी लघुविक्रमा ॥ ११॥

प्रभाते तु महावीर्यः कृत्वा पौर्वाह्णिकं क्रमम् ।
मुनिं प्राञ्जलिरामन्त्र्य प्रायात्पश्चान्मुखः पुनः ॥ १२॥

स गत्वा यमुनातीरं सप्तरात्रोषितः पथि ।
ऋषीणां पुण्यकीर्तीनामाश्रमे वासमभ्ययात् ॥ १३॥

स तत्र मुनिभिः सार्धं भार्गवप्रमुखैर्नृपः ।
कथाभिर्बहुरूपाभिर्वासं चक्रे महायशाः ॥ १४॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com